श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमन्निगमान्तमहादेशिकैः अनुगृहीता

# ॥ श्री परमार्थस्तुतिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री परमार्थस्तुतिः ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमद्गृध्रसरस्तीरपारिजातमुपास्महे।
यत्र तुङ्गैरतुङ्गैश्च प्रणतैर्गृह्यते फलम्॥ 1 ॥

गुरुभिस्त्वदनन्यसर्वभावैः गुणसिन्धौ कृतसम्प्लवस्त्वदीये।
रणपुङ्गव वन्दिभावमिच्छन् अहमस्म्येकमनुग्रहास्पदं ते॥ 2 ॥

भुवनाश्रयभूषणास्त्रवर्गं मनसि त्वन्मयतां ममातनोतु।
वपुराहवपुङ्गव त्वदीयं महिषीणामनिमेषदर्शनीयम्॥ 3 ॥

अभिरक्षितुमग्रतः स्थितं त्वां प्रणवे पार्थ रथे च भावयन्तः।
अहितप्रशमैरयत्नलभ्यैः कथयन्त्याहवपुङ्गवं गुणज्ञाः॥ 4 ॥

कमला निरपायधर्मपत्नी करुणाद्याः स्वयमृत्विजो गुणास्ते।
अवनं श्रयतामहीनमाद्यं स च धर्मस्त्वदनन्यसेवनीयः॥ 5 ॥

कृपणाः सुधियः कृपासहायं शरणं त्वां रण पुङ्गव प्रपन्नाः।
अपवर्गनयादनन्यभावाः वरिवस्यारसमेकमाद्रियन्ते॥ 6 ॥

अवधीर्य चतुर्विधं पुमर्थं भवदर्थे विनियुक्तजीवितः सन्।
लभते भवतः फलानि जन्तुः निखिलान्यत्र निदर्शनं जटायुः॥ 7 ॥

शरणागतरक्षणव्रती मां न विहातुं रणपुङ्गवार्हसि त्वम्।
विदितं भुवने विभीषणो वा यदि वा रावण इत्युदीरितं ते॥ 8 ॥

भुजगेन्द्रगरुत्मदादिलभ्यैः त्वदनुज्ञानुभवप्रवाहभेदैः।
स्वपदे रणपुङ्गव स्वयं मे परिचर्याविभवैः परिष्क्रियेथाः॥ **9** ॥

विमलाशयवेङ्कटेशजन्मा रमणीया रणपुङ्गवप्रसादात्।
अनसूयुभिरादरेण भाव्या परमार्थस्तुतिरन्वहं प्रपन्नैः॥ **10** ॥

॥ इति श्री परमार्थस्तुतिः समाप्ता ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥